(जगदीशी) अवच्छेदकत्व निरुक्ति of जगदीश तर्कालंकार – Loose leaves lithoprint edn., Publication place and date not given, but probably published from Benares.

1265

10

Bill No. 5/07-08

62

2008-0521

अथजागदीश्यवच्छेदकत्वनिरुक्तिः प्रारभ्यते ॥

KALANIDHI
Rare Book Collection
ACC No.: R-591
IGNCA Date: 26.3.08
SANS
181.43
JAG
DATA ENTERED
Date 25/07/08
1265
Indira Gandhi National Centre for the Arts

जा॰अ॰ श्रीगणेशायनमः नन्ववच्छेदकत्वमिहनस्वरूपसम्बन्धविशेषः सम्भवति चलयोर्धर्म्मयोर्गुरौनदभावात् प्रमेयधूमत्वकम्बुग्रीवादिमत्वप्राणया
१ त्पगुणत्वादेरनयात्वेननेनरूपेणसाध्यनायांव्यभिचारिण्यतिप्रसंगात् नाप्यनतिरिक्तवृत्तित्वंप्रतियोगितायाः स्वरूपसम्बन्धात्मिकायाः प्र
तिव्यक्तिभिन्नत्वेनधूमत्वादेरपिनदनिरिक्तवृत्तित्वात्। नचनथाविधयत्किंचिदेकाभावप्रतियोगितासामान्यशून्यावृत्तित्वंतत् अतएवाति
रिक्तसामान्याभावस्याभावेधूमत्वादेरप्यनवच्छेदकत्वापानात्तेनत्साधनमपिसाधुसंगच्छतइतिवाच्यं वन्हियदवृत्तिद्वित्वनारणोनार्ण
दरुनवृत्तिद्वित्वाद्यवच्छिन्नप्रतियोगिताकाभावप्रतियोगितानतिरिक्तवृत्तिवन्हित्वादावतिप्रसंगात् एतेनान्यूनवृत्तित्वविशेषितमपिप-
रास्तम् अतएवनानाप्रतियोगिवृत्त्येकप्रतियोगितांगीकारेऽपिननिस्तारः लघुरूपसमनियतगुरुरूपेणसाध्यतायां सद्धेतावव्याप्तिः नाह-
शानवच्छिन्नत्वाप्रसिद्धेरितिचेन्नप्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वस्यविवक्षितत्वात्। स्वसमानवृत्तिकंचावच्छेदकंयास्यंतत्वञ्च
स्वपर्याप्त्यधिकरणपर्याप्तिवृत्तिकत्वंयावत्वादिकन्तुननथापर्याप्तिघ्वायमेकोघटइमौद्वाविनिप्रतीतिसाक्षिकःस्वरूपसंबंधविशेषएव-
त्रित्वादिकमपितद्वित्वादिसमानवृत्तिकंभिन्निद्वित्वादिनासाध्यतायांनाव्याप्तिः यदकञ्चावच्छेदकत्वंस्वरूपसम्बन्धविशेषः एवञ्चयद्ध
र्मावच्छिन्नेत्यत्रयद्धर्मान्यूनवृत्तिधर्मावच्छिन्नेति वक्तव्यं तेनोक्ताव्याप्तिनिरासः।वस्तुतस्तुतदवच्छिन्नप्रतियोगिताकाभाववद्वृत्तिसंबद्धस्वविशि
शिष्टसामान्यकत्वं स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वंवातद्वनतिरिक्तवृत्तित्वंवक्तव्यम् अतएवसत्तावान्जातेरि-
त्यादौजातिमन्निष्ठाभावप्रतियोगितावच्छेदकगुणान्यत्वविशिष्टसत्तात्वतुल्यवृत्तिकत्वेऽपिसत्तात्वस्यनक्षतिः एवंस्वविशिष्टसंबंधिनिष्ठा राम
भावप्रतियोगितानवच्छेदकावच्छेद्यत्वंवोध्यंतादृशप्रतियोगिताश्चविशिष्योपादेयाः नानागुरोरवच्छेदकत्वंविनादुर्वचत्वंप्रतियोगित्वंसम्ब १

Indira Gandhi National Centre for the Arts

न्धित्वञ्चसाध्यतावच्छेदकसम्बन्धेनबोध्यमतोनसम्बन्धभेदमादायदोषः।कालिकविशेषणताविशेषेणचसाध्यतायांनादृशप्रतियोगिताव-
च्छेदकत्वमनित्यतनन्यक्तित्वेप्रसिद्धम् अभावश्चप्रतियोगिव्यधिकरणोबोध्यः।नचमौलमिदमीयञ्चप्रतियोगिवैयधिकरण्यमनुपादेयंसंयोग
त्वाद्यवच्छिन्नाभाववतिसंयोगत्वादिविशिष्टस्यतत्रगुणादिनिष्ठाभावप्रतियोगितावच्छेदकद्रव्यत्वत्वद्रव्यमात्रसमवेतत्वाद्यवच्छिन्नाभावव
निष्ठाद्वतेरव्याप्त्यतिव्याप्त्योरनवकाशादितिवाच्यंधूमवान् वह्नेरित्यादावतिव्याप्तेः नत्यक्तत्यनिकालावच्छेदेनापिमहानसादौकिंचित्संयोगेनवर्त्ति
तेयेनवह्निमदयोगोलकनिष्ठात्यन्ताभावप्रतियोगितावच्छेदकायोगोलकान्यत्वद्रव्यत्वाद्यवच्छिन्नाभाववद्वृत्तित्वंधूमत्वविशिष्टस्यसंभाव्ये
त।प्रतियोगितयोरेकसंबन्धावच्छिन्नत्वस्यविशेषणताविशेषावच्छिन्नत्वस्यवाविवक्षणेपुनरनुपादेयमेव प्रतियोगिवैयधिकरण्यद्वयम् यत्रा
धिकरणेव्यभिचारस्तदन्य त्वत्वतदन्यत्वप्रकारकप्रमाविषयत्वत्वसाध्यवत्वप्रकारकप्रमाविषयत्वत्वादीनांसाध्यतावच्छेदकविशिष्टसाध्यवन्नि
ष्ठात्यन्ताभावप्रतियोगितानवच्छेदकत्वाद्धेतुतावच्छेदकविशिष्टहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकत्वाच्चातिव्याप्तेरनवकाशात् तथाचवि-
शेषणताविशेषावच्छिन्नयद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वंतत्संबन्धावच्छिन्नसाधनसमानाधिकरणात्य-
न्ताभावप्रतियोगितासामान्येनास्तिसाधनेनद्धर्मविशिष्टसामानाधिकरण्यं व्याप्तिरितिपर्यवसितोऽर्थः यत्रसद्धेतुविशेषेसाध्यतावच्छेदकंन
प्रतियोगितावच्छेदकंतत्रैवेयंरीतिरुपादेयेत्यपिवदन्ति गौरवप्रतिसंधानदशायामपि कम्बुग्रीवादिमान्नास्तीतिप्रतीतिबलात् गुरुरपिधर्मो
ऽवच्छेदकः प्रतियोगितायाः। नचास्यास्तत्प्रतियोगिकाभावमात्रमवलम्बनंतथाविधयत्किंचिद्व्यक्तिसत्त्वएव तादृशप्रतीतेरनुदयात् अतएवैक
घटवतिभूतलेकम्बुग्रीवादिमान् नास्तीतिशब्दोनप्रमाणंप्रमाणञ्चघटसामान्यशून्येनचैवंलघुरूपसमनियतानांगुरूणामव्याप्यतापत्तिःगु

Indira Gandhi National Centre for the Arts

न्या·अ· णादिगुणकर्मान्यत्वविशिष्टसत्तादिसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वनिष्ठायाः प्रतियोगितायालाघवेनद्रव्यादिनिष्ठाभावप्रतियो
२ गितावच्छेदकत्वत्वेनैवावच्छेदानन्तत्तदवच्छेदकत्वव्यक्तीनांचप्रातिस्विकरूपेणाभावानांयुगसहस्रेणापिज्ञातुमशक्यत्वात् एवंद्रव्यत्वादिवि
शिष्टद्रव्यत्वादेरव्याप्यत्वप्रसंगोऽप्यनुसन्धेयः उपदर्शितप्रकाराणामपिस्वत्वादिघटितत्वेनदुर्ज्ञेयत्वात् अतएवघ्राणग्राह्यगुणत्वादिनासा-
ध्यतायांद्रव्यत्वादेर्व्यभिचारित्वं साधुसंगच्छत इत्यपिकेचिदितिव्यक्तंपल्लविनेन ॥ इत्यवच्छेदकत्वनिरुक्तेः शिरोमणिः॥ अथावच्छेदकत्वनिरु
क्तिः॥ इहानवच्छेदकत्वमित्यत्रावच्छेदकत्वमवच्छेदकत्वपदार्थः विशिष्टसत्तात्वसमनियतस्यसत्तात्वस्यलघुनोपितविशिष्टाभावस्यप्रति-
योगितावच्छेदकत्वंगुणादावपिसत्तानास्तीतिप्रतीतिप्रसंगात् पृथिवीसमवेतत्वासमनियतस्यापिद्रव्यसमवेतत्वस्यपृथिवीसमवेताभावप्रति
योगितावच्छेदकत्वमनतिप्रसंगात् एवंघटरूपत्वस्यासमनियतमपिरूपत्वंव्यधिकरणसंयोगादिसम्बन्धावच्छिन्नघटरूपाद्यभावस्यप्रतियो
गितावच्छेदकमतः समनैयत्यमकिंचित्करंयस्यावच्छेदकत्वस्वीकारेऽतिप्रसंगाद्यभावः सएवावच्छेदकइत्याशयेनाहसंभवतीति अतिप्रसंग
द्यनापादकेलघौसंभवतीत्यर्थः प्रमेयधूमत्वस्यतादृशप्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधूमत्वातिरेकादाह। कंबुग्रीवेति नचकंबु
ग्रीवादिमत्त्वंकंबुग्रीवादिव्यक्तिरेवसाचप्रत्येकंहेतुमन्निष्ठाभावप्रतियोगितावच्छेदिकैवेतिकुतोनिव्याप्तिरितिवाच्यं परम्परयासंस्थानगतक
म्बुग्रीवात्वादिनातिमत्त्वस्यैवसाध्यतावच्छेदकत्वात् तस्यचपरंपरयावच्छेदकत्वकल्पनामपेक्ष्यलाघवेनघटत्वस्यैवसाक्षात्तथात्वादितिभावः
ननुपृथिवीत्वतेजस्त्वादिसांकर्यात् घटत्वंयदितानानद्दानेकमपिघटत्वंकंबुग्रीवादिमत्त्वसमनियतमतआह। घ्राणग्राह्येति। घ्राणग्राह्यगुण राम
त्वापेक्षयालघोर्गन्धग्राह्यगंधत्वस्यैवप्रतियोगितावच्छेदकत्वादितिभावः अन्यथापरमाणौगंधत्वेनसहघ्राणग्राह्यगुणत्वस्यसमनियतत्वाभावा २

Indira Gandhi National Centre for the Arts

न् गंधत्वस्यैवप्रतियोगितावच्छेदकत्वाभावादितिभावः अत्रघ्राणग्राह्यगुणत्वंघ्राणग्राह्यत्वेसतिगुणत्वाव्याप्यजातिमत्त्वंतेनगंधत्वस्यलघोः समनैयत्ये-
तात्पर्यमित्यपिकश्चित् अन्यथात्वेनप्रतियोगितानवच्छेदकत्वेननेनरूपेणप्रमेयधूमत्वादिरूपेणेत्यर्थः। व्यभिचारिणिप्रमेयत्वादौ सपक्षवृत्तिप्रमेयत्वादौ
तेनविरुद्धसाध्यसामानाधिकरण्याभावादतिव्याप्त्यभावेपिनक्षतिः नापीति तादृशप्रतियोगितायास्तत्तद्व्यक्तित्वावच्छिन्नाभाववद्वृत्तित्वमपिनेत्यर्थः
तेनतादृशप्रतियोगिताप्रतियोगिकाभाववद्वृत्तितयाधूमत्वादेरवच्छेदकत्वाभावादतिप्रसंगसंभवात्स्वरूपसंबन्धात्मिकाया इत्यस्यनवैयर्थ्यंनवाधिम
ग्रंथविरोधइतिध्येयं स्वरूपसंबंधात्मिकायाइति प्रतिव्यक्तिभिन्नत्वेहेतुः तत्तदभावप्रतियोग्युभयस्वरूपायाइतितदर्थः तत्तत्प्रतियोगिमात्रस्वरूप
त्वेसामान्याभावविशेषाभावयोः प्रतियोगितायामविशेषापत्तिरितिध्येयं धूमत्वादेरपीति तथाचधूमाभाववान्वह्नेरित्यादौ व्याप्तिलक्षणगतिव्याप्तिरितिभा
वः नचेतिवाच्यमितिपरेणान्वयः तथाविधेति यत्किंचित्पदंव्याप्यवृत्तिसाध्यकस्थलीयलक्षणाभिप्रायेणतथाच तथाविधोहेतुसमानाधिकरणो
योयत्किंचिदभावस्तत्प्रतियोगितावच्छिन्नाभाववद्वृत्तित्वं तत्रार्थः तथाविधाभावीयप्रतियोगितासामान्यस्यन्यूनत्वमप्रसिद्धं सर्वस्यैववस्तुनस्ता
दृशयावत्तावच्छिन्नाभावप्रतियोगितासत्वादतउक्तं यत्किंचिदिति समनियताभावयोरैक्यानुपगमाच्च तेनघटादिसामान्याभावस्यैवघटीयादि
संयोगसम्बन्धेनप्रमेयादिसामान्याभावतयातन्नाप्रसिद्धिः एकधर्मावच्छिन्नार्थकंपदं अव्याप्यवृत्तिसाध्यकस्थलीयनिरुक्ताभिप्रायेणतथावि
धायाएकधर्मावच्छिन्नाप्रतियोगितानत्सामान्यशून्यावृत्तित्वमितियोजना यत्प्रतियोगितायाअवच्छेदकीभूतधर्मावच्छिन्नानधिकरणत्वंहेतुम
तत्तत्प्रतियोगितायाअवच्छेदकीभूतधर्मावच्छिन्नप्रतियोगितासामान्यशून्यत्वंतत्रार्थइतिवस्तुगतिः एकपदंश्रृंगग्राहिकतयातत्तदभावप्रवेशा
र्थमितितुरिक्तंवचस्तन्निवेशवैयर्थ्यात् यत्किंचित्पदेनैवतल्लाभादितिध्येयम्। यदपिप्रमेयवान्वाच्यत्वादित्यादौसमवायेनसाध्यतायांव्यभिचा

Indira Gandhi National Centre for the Arts

जा.अ. रिण्यनिव्याप्तिः प्रमेयत्वावच्छिन्नाभावप्रतियोगितासामान्यशून्यत्वाप्रसिद्धेः तादृशाभावान्तरस्य निरुक्तप्रतियोगितानवच्छेदकतायाः प्रमेयत्वेऽस
३ त्वात्तथापि तादृशयत्किंचिदेकाभावप्रतियोगितात्वं यद्धर्मव्यापकतावच्छेदकं तत्त्वं विवक्षितमस्ति च प्रमेयत्वव्यापकत्वं प्रमेयसामान्याभावप्रतियो
गितायामित्यदोषः तत् अवच्छेदकत्वं अत एवेति यत्किंचिदेकाभावव्यक्तेः प्रवेशादित्यर्थः यदि सामान्याभावो नास्ति तदा वह्निमान्नित्यत्र तद्धूमा
भावप्रतियोगितासामान्यशून्ये धूमान्तरे वर्तमानतया धूमत्वस्य निरुक्तावच्छेदकत्वं तस्यादिति व्याप्तिलक्षणातिव्याप्तिनिरासार्थमेव सामान्याभा
वः साधयिष्यत इति तथा च धूमसामान्याभावस्यैव हेतुसमानाधिकरणस्य प्रतियोगितासामान्यशून्ये घटादावद्वृत्त्या धूमत्वस्यावच्छेदकत्वमि
ति भावः ननु तादृशप्रतियोगितान्यूनानतिरिक्तवृत्तित्वं वाच्यं वह्नित्वं तु घटवृत्तितादृशप्रतियोगितान्यूनवृत्ति अत आह तार्णतार्णेति अतिप्रसंगादि
ति तथा च व्याप्तिलक्षणासंभव इति भावः एतेनेति क्वाचित्कं तत्र एतेन तार्णतार्णोभयाभावमादाय तत्र दोषेण सामान्याभावप्रतियोगित्वमेक
मेव समस्तप्रतियोगिवृत्ति इति तत्र न्यूनातिरिक्तवृत्तित्वे च धूमत्वमतो नोक्तातिव्याप्तिरिति प्रगल्भोक्तं दूषयति। अत एवेति। उक्तरीत्या वह्नित्वादेरवच्छेद
कत्वप्रसंगादेवेत्यर्थः। ननु प्रतियोगितानवच्छेदकमित्यत्रावच्छेदकत्वं स्वरूपसम्बन्धरूपमेव वाच्यं स्वावच्छेद्यप्रतियोगिताकत्वेन साध्यताव-
च्छेदकं पुनर्विशेषणीयमतो गुरुधर्मेण साध्यतायां नातिव्याप्तिरत आह। लघुरूपेति ननु घटवान्महाकालत्वादित्यादावव्याप्तिभियैव गुरुरू
पेण साध्यतायामतिव्याप्तिभिया पि प्रतियोगिताधर्मिकोभयाभावघटितं लक्षणं वाच्यमतस्तदपि दूषयति लघुरूपेत्यादिनेत्यपि कश्चित् वह्नित्वादिल
घुरूपसमनियतं प्रमेयवह्नित्वादिकं तादृशरूपेण साध्यतायां धूमादावव्याप्तिरित्यर्थः प्रतियोगितावच्छेदकेति हेतुसमानाधिकरणाभावप्रतियोगि
तायाः यदवच्छेदकं तदभाववद्वृत्तित्वस्य मूलस्थप्रतियोगितावच्छेदकतानेन विवक्षितत्वादित्यर्थः। अत्र येन संबन्धेन प्रतियोगितावच्छेदकत्वं तेन

Indira Gandhi National Centre for the Arts

वत्तदभावोयत्रास्त्येतेनधूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्यघटत्वादेः कालिकादिसम्बन्धेनाभाववत्यात्मादौवह्नित्वादेः समवायेनादृ-
नावृत्तिनोऽवच्छेदकत्वंनवाधूमत्वादेः संयोगादिसंबन्धेनस्वाभाववन्निसमवेतत्वेप्यवच्छेदकत्वहानिः यत्तुसाध्यतावच्छेदकताघटकसंबन्धेनतद-
भावोयत्रास्तिइति नन्वेवंधूमत्वप्रकारकप्रमाविशेष्यवानवह्नेरित्यादावतिव्याप्तेः लघुतयाहेतुमन्निष्ठतादृशप्रमाविशेष्याभावप्रतियोगितावच्छेद-
कीभूतस्यधूमत्वादेः स्वरूपसम्बन्धेनाभाववृत्तिधूमएवतादृशप्रमाविशेष्यत्वस्यवृत्तेः तद्वृत्तित्वंचस्वरूपसंबन्धेननवृत्तिसाध्यतावच्छेदकताघट-
कसम्बन्धेनावर्तमानत्वं नातोधूमत्वाभावस्यैवकालिकसम्बन्धेनाश्रयेधूमेसमवायेनस्वरूपसम्बन्धेनचतदाश्रयेस्पंदादौकालिकविशेषणता-
याधूमत्वस्यवर्तमानत्वात् अवच्छेदकत्वहानिः नचतथापिसमवायेनप्रमेयस्यसाध्यतायांभावत्वादावतिव्याप्तिः प्रमेयत्वरूपस्यावच्छेदकस्या-
भावाप्रसिद्ध्याप्रमेयभावस्यलक्षणाघटकत्वादितिवाच्यंहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकंयद्धर्मान्यूनवृत्तित्वस्यैवविवक्षितत्वात्
ततएवसमवायेनसत्ताश्रयस्यसाध्यत्वेपितादृशावच्छेदकीभूतस्यसत्वस्याभाववत्तिसामान्यादौसाध्यतावच्छेदकताघटकीभूतसमवायसम्बन्धेनवृ-
त्तेरप्रसिद्धावपिभावत्वादिहेतौनातिव्याप्तिः। इदंतुचिन्त्यमनेनतादृशप्रतियोगितावच्छेदकानतिरिक्तवृत्तिभिन्नत्वापेक्षयानञर्थद्वयाप्रवेशेनलाघवा-
त्तादृशावच्छेदकंयद्यत्तत्तत्स्यैकानतिरिक्तवृत्तित्वंसाध्यतावच्छेदकस्यविशेषणंवक्तुमुचितं ननुधूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकंयद्य-
द्व्यादिनिष्ठंतादृशतादृशहेतोभयत्वंयावत्त्वंवातदनतिरिक्तवृत्त्येववह्नित्वादिकमितिव्याप्तिलक्षणमसंभवीत्यतआह। स्वसमानेतिस्वमनतिरिक्त-
वृत्तित्वेनाभिमतम्। तथाचस्वसमानवृत्तिकंयद्धेतुमन्निष्ठाभावप्रतियोगितावच्छेदकंतदनतिरिक्तवृत्तित्वमर्थः। ननुस्वसमानवृत्तिकत्वंस्वान्यूनान-
तिरिक्तवृत्तित्वंतथाचवह्निनिष्ठयावत्त्वादेरपिसमवायादिनावह्नित्वादिसमानवृत्तित्वमेवातआह। तत्त्वंचेति। स्वसमानवृत्तिकत्वंचेत्यर्थः पर्य्याप्ती

ज्ञा॰अ॰ नित्यवह्नित्वपर्य्याप्त्यधिकरणे यावत्येव वह्नौ वह्निवृत्तियावत्त्वादेः पर्य्याप्तत्वाद्वह्नित्वस्यावच्छेदकत्वं दुर्वारमिति वाच्यं स्वपर्य्याप्त्यवच्छेदकधर्मा-
४ वच्छिन्नपर्याप्तिकत्वस्योक्तत्वात् वह्नित्वपर्य्याप्त्यवच्छेदकीभूततत्तद्वह्नित्वावच्छेदेन यावत्त्वादेरपर्य्याप्तत्वात् न चैवमनतिरिक्तवृत्तित्ववैयर्थ्यं व-
ह्नित्वपर्य्याप्त्यवच्छेदकधर्मावच्छिन्नपर्य्याप्तिकतत्तद्वह्न्यन्यतरत्वादिकमादाय वह्नित्वस्यापि पारिभाषिकावच्छेदकत्वापत्तेरिति भावः यावत्त्वा-
दिकमिति आदिना नाना नानोभयत्वादिसंग्रहः तत्तदिति नवह्नित्वपर्याप्त्यधिकरणपर्य्याप्तिकमित्यर्थः ननु पर्य्याप्तिः समवायः स च नाना ना-
नोभयत्वादावप्यस्त्यत एवेत्यत आह। पर्याप्तिश्चेति अयमेको घट इति एकमात्रवृत्तिधर्मावच्छेदेन घटत्वस्य पर्य्याप्तिं दर्शयितुं इमौ द्वावित्युभयवृ-
त्तिधर्मावच्छेदेन द्वित्वस्य पर्याप्तिं दर्शयितुं अन्यथा द्वौ द्वित्ववानिति प्रतीत्योरविशेषप्रसंगादिति भावः न चायमेक इत्यादिप्रतीतेः समवायेनैवोपपत्तेरेक-
त्ववह्नित्वादेः पर्याप्तिसम्बन्धत्वे मानाभावात् तादृप्येण साध्यतायां व्यभिचारिण्यतिव्याप्तिरिति वाच्यं इदंत्वावच्छिन्ने एव एव वह्नित्वमेकत्वं च पर्य्या-
प्तं न तु द्वित्वमित्याद्यनुभवादेव तदभ्युपगमादिति भावः व्यासज्यवृत्तित्वतदन्यत्वान्यतररूपेणैव स्वसमानवृत्तित्वोक्त्यापि वह्नित्वादिवारणासंभवे स्व-
पर्य्याप्तीत्यादिपर्यन्तानुधावनस्य प्रयोजनमाह त्रित्वादिकमिति तथा च धूमवन्निष्ठाभावप्रतियोगितावच्छेदकस्य वह्निधूमघटत्रितयत्वस्य व्यास-
ज्यवृत्तितया स्वसमानवृत्तिकस्य तस्यैवानतिरिक्तवृत्तित्वं वह्निधूमोभयत्वस्यापीति तादृप्येण स्वसमानवृत्तिकत्वोक्तौ वह्निधूमोभयवान् धूमादि-
त्यादावेवाव्याप्तिलक्षणाव्याप्तिः स्यादिति भावः यद्यपि नाना नानोभयत्वाद्यवच्छिन्नाभावस्य प्रतियोगितावच्छेदकताघटकसंबंधः पर्य्याप्तिरेव न
तु समवायः नानामात्रसत्त्वेपि नाना नानोभयं नास्तीति प्रतीतेः तथा च प्रतियोगितावच्छेदकताघटकपर्य्याप्तिसंबन्धेन तादृशोभयत्वाद्यभाववन्निष्ठ- राम
त्तिकवह्नौ वृत्तिमत्त्वादेव वह्नित्वादेरवच्छेदकत्वासंभवात् स्वसमानवृत्तिकेत्यंशव्यर्थं तथापि प्रत्येकवह्नौ पर्य्याप्तिसम्बन्धेनापि नाना नानोभय ४

Indira Gandhi National Centre for the Arts

त्वादेरभावः किंतु घटादावेव अन्यथा तत्सम्बन्धेन प्रत्येकावृत्तिधर्मस्य तत्संबंधेन समुदायावृत्तित्वनियमात् उभयत्रैव प्रत्येकद्वित्वाभावसत्वा-
दिमौ न द्वावित्यपि प्रतीत्यापत्तेः नचैवमयं द्वावित्यपि प्रत्यक्षप्रतीतिः प्रमा स्यादेकव्यक्तावपि द्वित्वस्य पर्य्याप्तिसम्बन्धेन सत्वादिति वाच्यं मूलाव
च्छिन्नो वृक्षः कपिसंयोगीत्यादिप्रतीते मूलावच्छेद्यसमवायेन कपिसंयोगाद्यवगाहित्ववदुक्तप्रतीतेरपीदंत्वावच्छेद्यपर्य्याप्तिसम्बन्धेनैव
द्वित्वावगाहितया प्रमात्वायोगात् एकव्यक्तेरिदंत्वावच्छेद्यपर्य्याप्तिसम्बंधेन द्वित्वरहितत्वात् अतएवायं न द्वावित्यादिप्रतीतेः प्रमात्वमुपपद्य
ते इदंत्वावच्छेद्यपर्य्याप्तिसम्बन्धेन यो द्वित्वस्याभावस्तद्वृत्तितदवगाहित्वात् नचेदंत्वावच्छेद्यपर्य्याप्त्यप्रसिद्धेः एकत्ववन्हित्वादौ तत्सौलभ्यात्
एकत्वं वन्हित्वं चेदंत्वावच्छिन्नपर्य्याप्तं न तु द्वित्वादिकमित्यनुभवस्य सर्वसिद्धत्वात् नचैकस्य द्वित्वपर्य्याप्त्यधिकरणत्वे घटद्वयशून्येऽपि गृहादाव
त्र घटाविति प्रतीतिः प्रमा स्यादिति वाच्यं तद्गृहनिष्ठे घटे घटद्वयत्वावच्छेदेन तद्गृहवृत्तित्वविरहात् घटद्वयत्वावच्छेदेन तद्गृहवृत्तित्वावगाहिन्यां
प्रोक्तप्रतीतेर्भ्रमत्वात् अतएव घटौ न तद्गृहनिष्ठावित्याकारकधीस्तत्र प्रमा तद्गृहस्थितस्यापि घटस्य घटद्वयत्वावच्छेदेन तन्निष्ठत्वाभावसंभवात् घ
टपटयोर्न घटत्वमित्यादिप्रतीतेः प्रमात्वं तु रोधेन व्यासज्यवृत्तिधर्मावच्छिन्नाधिकरणताकस्य प्रतियोगिमत्यपि तदभावस्य सर्वसंमतत्वात् नच घट
त्वादौ घटपटोभयवृत्तित्वाभाव एवोक्तप्रतीतिविषयः सामान्यघटयोर्न समवायेन घटत्वमित्यादौ सामान्यघटोभयसमवेतत्वाप्रसिद्ध्या तदभावस्य
भानासंभवादिति संप्रदायविदः परे तु तदनतिरिक्तवृत्तित्वमत्र तदभाववद्वृत्तित्वं तथा सति हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वन्हिधूमो
भयत्वं प्रत्येकं तदभाववान्वन्हिधूमयोर्वृत्तितदुभयवृत्तित्वस्यैव वन्हिधूमोभयत्वे सत्वात् तादृशरूपेण साध्यतायां वन्ह्यादिहेतावतिव्याप्त्यापत्तेः किंतु तादृ
शप्रतियोगितावच्छेदकतावती यावती व्यक्तिस्तद्भेदकूटवद्वृत्तित्वमेव तथा वाच्यं तथा च वन्हिमान्धूमादित्यत्राव्याप्तिरेव तादृशावच्छेदकीभूतं यत्ता

Indira Gandhi National Centre for the Arts

र्णतारणोभयत्वादिकं न हेतौ निखिलवह्नेः प्रत्येकभेदकूटवन्निष्ठवह्नित्वस्यावृत्तेरतः स्वसमानवृत्तिकत्वं देयमेवेति वदन्ति ननूक्तहेतुमन्निष्ठाभावप्र-
तियोगितानवच्छेदकं यद्धूमत्वं तदभाववन्निपर्याप्तिसम्बन्धेन वह्निधूमोभयत्वस्यावृत्तित्वादेव नातद्रूपेण साध्यतायां वह्निहेतावतिव्याप्त्यभावाद्धेतु-
दनिवेशव्यर्थतापातादिति केचित्तु तार्णतारणोभयं तार्णीति प्रतीतौ प्रतियोगितावच्छेदकतानिर्वाहकः समवाय एव सम्बन्धो भासते न तु पर्याप्तिः
दण्डपुरुषत्वाद्युभयस्य सत्त्वेपि तदवच्छिन्नाभाववत्त्वाद्दृशोभयत्वाद्युभयस्य तार्णमात्रस्य सत्त्वेपि तादृशोभयत्वावच्छिन्नाभावो न विरुद्धस्तदवच्छि-
न्नाधिकरणतया साध्यमेव न स्याद्विरोधात् एवं च यथाश्रुतमेव सम्यगित्याहुस्तच्चिन्त्यं वक्तृनक्तृसमवायेन प्रमेयसाध्यकेभावत्वादिहेतावतिव्याप्ति-
वारणार्थमवश्यं प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमित्यस्य हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यदन्यूनवृत्तित्वमर्थो वाच्यः तत्रान्यूनवृ-
त्तित्वं न प्रतियोगितावच्छेदकताघटकसम्बन्धेन वाच्यं वह्निधूमोभयवान्वह्नेरित्यादावतिव्याप्तेः हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यद्वह्निधू-
मोभयत्वं तस्य तादृशपर्याप्त्यधिकरणयद्वह्निधूमोभयं तत्प्रत्येकनिष्ठस्य पर्याप्तिसम्बन्धावच्छिन्नाभावस्य प्रतियोगित्वसत्त्वेन वह्निधूमोभयत्वा-
दिकं प्रत्यन्यूनवृत्तित्वात् किंतु स्वावच्छिन्नप्रतियोगित्वसम्बन्धेनैव तथात्वं वाच्यं तथा च वह्निनिष्ठयावत्त्वतार्णतारणोभयत्वादेरपि स्वावच्छिन्नप्रतियो-
गित्वसम्बन्धेन वह्नित्वादिकं प्रत्यन्यूनवृत्तित्वात् वह्निमान्धूमादित्यादौ वह्नित्वादेरवच्छेदकत्ववारणाय स्वसमानवृत्तिकत्वेनावच्छेदकं विशेष-
णीयमिति युक्तमुत्पश्यामः ननु प्रतियोगितावच्छेदकानतिरिक्तवृत्तित्वमित्यस्य घटकं प्रतियोगितावच्छेदकत्वं यदि प्रतियोगितानतिरिक्तवृत्तित्वरू-
पं तदा तार्णतारणोभयत्वावच्छिन्नाभावमादाय वह्निमान्धूमादित्यादौ वह्नित्वं पारिभाषिकावच्छेदकं स्यादत आह घटकमिति प्रतियोगिताधर्मिको राम
भयोभावघटितलक्षणे गुरुरूपेण साध्यतायामव्याप्तिमपाकर्तुमाह एवं चेति ननु धूमत्वमेकस्मिन्नेव पर्याप्तमित्यादिप्रतीतेः प्रत्येकवृत्तिधर्मावच्छि- ५

Indira Gandhi National Centre for the Arts

न्याधिकरणत्वाकलत्वावगाहित्वयैवोपपत्तौ धूमत्वादेः पर्य्याप्तिसम्बन्धत्वेमानाभावइतिधूमवान्वन्हेरित्यादावतिव्याप्तिः स्वपदेनधूमत्वस्यगृहीतुमशक्य
त्वात् एवंसत्तात्वस्यविशिष्टसत्तात्वानतिरिक्तत्वेनतयासत्तादिसाध्यकजातिमत्त्वादिहेतावव्याप्तिश्चेत्यतआह। वस्तुतस्त्विति। तद्वच्छिन्नेति हेतु
मन्निष्ठाभावप्रतियोगितावच्छेदकीभूततत्तद्धर्मावच्छिन्नाभाववत्त्वसम्बद्धं यद्धर्मविशिष्टसामान्यंतद्देवपारिभाषिकावच्छेदकमित्यर्थः अत्रतदा
श्रयप्रतियोगिताकाभावेत्युक्तौनादृश्यधूमत्वाश्रयप्रतियोगिकोभयाभावादिमतिप्रमेयधूमत्वविशिष्टस्यसंबद्धत्वापावच्छेदकत्वंनस्यात्किंतुगगनत्वा
देरेवतथात्वंस्यादतउक्तं तद्वच्छिन्नेतिप्रतियोगित्वंसाध्यतावच्छेदकसम्बन्धेनग्राह्यंतेनायंघटइत्वादित्यादौहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं
घटत्वंसंबंधसामान्येनकालिकसंबंधेनवातद्वच्छिन्नाभाववतिनित्यगुणगगनादौघटत्वत्वविशिष्टस्यासंबद्धत्वेपिनाव्याप्तिः पर्वतादेरुसत्तिकाला
वच्छेदेनसंयोगसम्बन्धावच्छिन्नधूमाभाववत्त्वात् तत्रचधूमत्वविशिष्टस्यसंबद्धत्वात् तदसम्बद्धस्वविशिष्टसामान्यकंगगनादिकमुपादायधू
मवान्वन्हेरित्यादावतिव्याप्तिरतः प्रतियोगिव्यधिकरणत्वेनतद्वच्छिन्नाभावोविशेष्यः प्रतियोगितावच्छेदकसंबंधेनप्रतियोगितावच्छेदकाव-
च्छिन्नासंबंधीतद्वच्छिन्नाभाववान्यास्यइतितुपर्य्यवसितार्थः तेनसंयोगसम्बन्धावच्छिन्नधूमाभावस्यधूमवत्पर्वतादौसमवायादिसंबंधेन
प्रतियोगिव्यधिकरणत्वेपिधूमत्वस्यनावच्छेदकत्वहानिः नवाद्रव्यंघटत्वादित्यादौहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकंयद्ध्रदभिन्नद्रव्यत्वंत्वंप्र
तियोगिव्यधिकरणेतद्वच्छिन्नाभाववतिगुणादौद्रव्यत्वत्वविशिष्टस्यासत्त्वेप्यव्याप्तिः। वस्तुतोनिरुक्तप्रतियोग्यनधिकरणत्वमेवतद्वच्छिन्ना
भाववत्त्वः साध्यतावच्छेदकसंबंधेनवाच्यंननुप्रतियोगितायास्तत्संबंधावच्छिन्नत्वंहृत्तनियामकसम्बन्धेनसाध्यतायांतत्संबन्धावच्छिन्नप्रतियोगि
ताप्रसिद्ध्याव्याप्तिप्रसंगादितिध्येयं नचघटवान्महाकालत्वादौनादृश्यप्रतियोगितावच्छेदकयद्गगनत्वंतद्वच्छिन्नाभावस्यप्रतियोगिवैयधिकर

Indira Gandhi National Centre for the Arts

जा॰अ॰ यया प्रसिद्ध्या व्याप्तिरिति वाच्यं अत्रापि साध्यतावच्छेदकसम्बन्धसामान्येनैतादृशधर्मावच्छिन्नप्रतियोगिकत्वयदनुयोगिकत्वोभयाभावस्तत्स-
६ म्बद्धत्वस्य विवक्षितत्वात् न तत्सम्बद्धत्वमपि साध्यतावच्छेदकसम्बन्धेन सम्बन्धत्वसामान्याभावो बोध्यः तेन घटत्वाद्यवच्छिन्नाभाववति गगनत्ववि-
शिष्टस्यापि यथाकथंचित्तादात्म्यादिना संबद्धतया न पारिभाषिकावच्छेदकाप्रसिद्धिनिबन्धनो व्याप्तिलक्षणासंभवः । नवा तादृशप्रतियोगितावच्छेद-
कीभूतमहानसीयवह्नित्वावच्छिन्नाभाववति जलादौ वह्नित्वविशिष्टस्यासम्बद्धत्वाद्वह्निमान्धूमादित्यादावव्याप्तिः धूमवन्निष्ठाभावप्रतियोगिताव-
च्छेदकीभूततत्तद्वह्नित्वावच्छिन्नाभाववति वह्नित्वविशिष्टस्य तत्तद्वह्नेरसम्बद्धत्वाद्वह्निमान्धूमादित्यादौ वह्नित्वमप्यवच्छेदकं स्यादतः सामान्य
पदं ननु कालिकादिसम्बन्धेन गगनत्वविशिष्टं घटादि तस्य तादृशप्रतियोगितानवच्छेदकीभूतगगनत्वाद्यवच्छिन्नाभाववति साध्यताघटकसम्बन्धेन
सम्बन्धत्वात् पारिभाषिकावच्छेदकाप्रसिद्ध्या व्याप्तिलक्षणासम्भवः न च साध्यतावच्छेदकताघटकसम्बन्धेन स्ववैशिष्ट्याभिधानान्नैष दोषः पुरु-
षनिष्ठसंयोगसम्बन्धेन दण्डवतः कालिकविशेषणतया साध्यतायां महाकालत्वहेतावव्याप्त्यापत्तेः गगनत्वादेः पुरुषनिष्ठसंयोगसम्बन्धेनाहृसा
पारिभाषिकावच्छेदकाप्रसिद्धेः न च हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वं यादृशसम्बन्धावच्छिन्नं तेनैव सम्बन्धेन स्ववैशिष्ट्याभिधानान्न प्र-
दत्वा गगनत्वादौ पारिभाषिकावच्छेदकत्वं सुलभमिति वाच्यं धूमत्वप्रकारकप्रमाविशेष्यत्ववान्वह्नेरित्यादावव्याप्तिः साध्यतावच्छेदकमपेक्ष्य ल-
घोर्धूमत्वस्यैव समवायेन हेतुमन्निष्ठसंयोगसंबन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकतया समवायेन च धूमत्वप्रकारकप्रमाविशेष्यत्वस्याह-
त्वात्तस्य पारिभाषिकावच्छेदकत्वाभावप्रसंगात् न च साध्यत्वतादृशप्रतियोगित्वयोरन्यतरावच्छेदकताघटकसम्बन्धेनैव स्ववैशिष्ट्यस्य विव- राम
क्षणान्नोक्ताव्याप्त्यतिव्याप्त्योः प्रसंग इति वाच्यं तादात्म्येन धूमवतः संयोगेन साध्यतायां द्रव्यत्वादावतिव्याप्त्यापत्तेः धूमापेक्षया लघुत्वेन हेतुम- ६

Indira Gandhi National Centre for the Arts

न्निष्ठाभावप्रतियोगितावच्छेदकं यद्धूमत्वं तदवच्छिन्नाभाववति तत्परमाणौ प्रतियोगितावच्छेदकताघटकसमवायसंबंधेन धूमविशिष्ट-
स्य परमाणोः साध्यताघटकसंयोगसंबंधेन संबद्धतया धूमस्य पारिभाषिकावच्छेदकत्वविरहादिति चेत्तत्राहुः यद्यत्संबंधेन यद्धर्मविशि
ष्टसामान्यं निरुक्तधर्मावच्छिन्नाभाववति साध्यतावच्छेदकसंबंधेनासंबद्धं तत्तत्संबंधेन तत्तद्धर्मावच्छिन्नविशेष्यताभिन्नं यत्साध्यतावच्छे
दकताघटकसंबंधावच्छिन्नं विशेष्यत्वं तदवच्छेदकसाध्यतावच्छेदकधर्मवत्त्वस्य विवक्षितत्वान्नोक्तदोषः समवायेन वह्नित्वावच्छिन्नविशे
ष्यतायाः स्वरूपादिसंबंधेन गगनत्वावच्छिन्नविशेष्यताभिन्नत्वादेवावच्छेदकाप्रसिद्धिनिबंधनासंभवस्य व्युदासादिति नन्वेवमपि विशिष्ट
सत्तावान् ज्ञानेरित्यादावतिव्याप्तेस्तादृशद्रव्यत्वाद्यभाववति गुणादौ विशिष्टसत्त्वस्य संबद्धत्वात् स्वस्य तादृशधर्मावच्छिन्नाभाववन्निष्ठसंबं-
धितानवच्छेदकत्वविवक्षया कथंचित्तत्रातिव्याप्तिवारणेऽपि सत्तावान् भावत्वादित्यादावतिव्याप्तिः सत्तात्वाद्यवच्छिन्नाभाववति सामान्या
दौ साध्यताघटकसमवायसंबंधित्वाप्रसिद्धेः सत्तात्वस्य निरुक्तावच्छेदकत्वाभावात् न च साध्यतावच्छेदकसंबंधसामान्येन तदवच्छिन्ना
भाववदनुयोगिकत्वयद्धर्मावच्छिन्नप्रतियोगिकत्वोभयाभावस्तत्त्वं विवक्षितमतो नोक्तदोषः तथा सति प्रमेयधूमवान्वह्नेरित्यादावतिव्या-
प्त्यापत्तेः धूमत्वघटिततादृशोभयत्वापेक्षया प्रमेयधूमत्वघटिततादृशोभयत्वस्य गुरुतया तदवच्छिन्नप्रतियोगित्वाप्रसिद्धेरित्यस्वरसादाह।
स्वविशिष्टेति। स्वं पारिभाषिकावच्छेदकत्वेनाभिमतं तथा च हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्विशिष्टसंबंधितन्निष्ठाभावप्रति
योगितानवच्छेदकं स एव पारिभाषिकावच्छेदकः तदन्यत्वं साध्यतावच्छेदकविशेषणेति भावः अत्र विशिष्टसंबंधित्वं साध्यतावच्छेदकसंबं
धेन ग्राह्यं तेन प्रतियोगितावच्छेदकमात्रस्यैव यथाकथंचित्तत्संबंधेन यत्स्वविशिष्टसंबंधितन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि न पारिभा-

Indira Gandhi National Centre for the Arts

जा॰ अ॰ षिकावच्छेदकाप्रसिद्धिः अभावस्यात्र प्रतियोगिव्यधिकरणो बोध्यः तेन घटत्वाद्यवच्छेदकमात्रस्यैव स्वविशिष्टसंबंधिनिष्ठसंयोगसंबन्धाव
७ च्छिन्नाभावप्रतियोगितावच्छेदकत्वात् पारिभाषिकावच्छेदकाप्रसिद्धावह्निमान् धूमादित्यादौ नाव्याप्तिः प्रतियोगितावच्छेदकसंबंधेन
प्रतियोगितावच्छेदकविशिष्टप्रतियोग्यसंबंधित्वं स्वविशिष्टसम्बन्धिनो विशेषणं देयमिति तु फलितार्थः तेनाभावस्यैव यथाकथंचित्कालि
कादिसंबंधेन प्रतियोगिनः संबंधिनिष्ठत्वेऽपि न क्षतिः नवा हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतविशिष्टसत्तात्वादेः सत्तात्वाद्यवच्छि
न्नसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेऽपि सत्तावान् जातेरित्यादावव्याप्तिः तादृशप्रतियोगित्वं तु साध्यतावच्छे
दकसंबंधावच्छिन्नं ग्राह्यं तेन न घटत्वादेरपि स्वविशिष्टसंबंधिनिष्ठसमवायाद्यवच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितावच्छेदक-
त्वेऽपि वह्निमान् धूमादित्यादाववच्छेदकाप्रसिद्धिनिबंधनो दोषः वस्तुतः पूर्ववद्वह्न्यादावपि साध्यतावच्छेदकसंबंधेन निरुक्तप्रतियोग्यसंबंधित्व
मेव स्वविशिष्टसंबंधिनो वाच्यं तेन हृदत्वनियामकसंबंधेन साध्यतायां तादृशसंबंधावच्छिन्नप्रतियोगित्वाप्रसिद्धावपि नाव्याप्तिः प्रतियोगि
तानवच्छेदकमित्यत्रावच्छेदकत्वं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकताघटकसम्बन्धेन बोध्यं तेन घटत्वादेर्विषयितासम्बन्धे
न घटत्वादिविशिष्टस्य ज्ञानादेः संयोगेनाभावस्य प्रतियोगिव्यधिकरणस्य घटादिविशिष्टसंबंधिनिष्ठस्य प्रतियोगितायां विषयितासंबंधे-
नावच्छेदकत्वेऽपि न तादृशावच्छेदकाप्रसिद्धिः। ननूक्तपारिभाषिकावच्छेदकद्वयस्य प्रवेशो मूलोक्तप्रतियोगिव्यधिकरणस्य प्रतियोगिता
वच्छेदकावच्छिन्नप्रतियोग्यनधिकरणार्थकत्वं विफलं हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्य द्रव्यत्वत्वादेर्विशिष्टसत्तात्वाद्यवच्छि राम
न्नवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वादेव विशिष्टसत्तावान् जातेरित्यादावव्याप्त्यभावात् न च संयोगेन घटाद्यभावस्यैव तत्समनियत

Indira Gandhi National Centre for the Arts

घटविशिष्टवाच्यत्वाद्यभाववत्वात् तत्प्रतियोगित्वावच्छिन्नस्यचवाच्यत्वस्यसर्वत्रसत्वात् प्रतियोगिव्यधिकरणस्यैवाप्रसिद्धिः स्याद्यदिप्र
तियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यप्रवेशोनस्यादितिवाच्यंयत्प्रतियोगित्वावच्छिन्नस्यानधिकरणंहेत्वधिकरणंतत्प्रति
योगितावच्छेदकीभूतधर्मोयद्विशिष्टसंबंधिनिष्ठप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकस्तत्पारिभाषिकावच्छेदकमित्यस्य
निर्दोषत्वात् घटाभावस्यघटविशिष्टवाच्यत्वाभावस्वरूपत्वेपितस्यघटत्वावच्छिन्नंयत्प्रतियोगित्वंतदाश्रयव्यधिकरणत्वस्यसुलभत्वादि
ति नचतत्तावच्छेदकभेदेपिप्रतियोगितैक्यंयुक्तं घटपदाद्यभावानामप्येकप्रतियोगिताकत्वापत्तेरितिचेदत्रप्रांचः यत्प्रतियोगिताश्रयान
धिकरणंहेत्वधिकरणंतत्प्रतियोगितावच्छेदकेत्याद्यभिधानेवह्निमान्धूमादित्यत्राव्याप्तिः स्वरूपसम्बन्धात्मिकायाः प्रतियोगितायाः प्र
तिव्यक्तिभिन्नत्वात् वह्नित्वावच्छिन्नाभावीयंमहानसीयवह्निवह्निनिष्ठंयत्प्रतियोगित्वंतदवच्छिन्नानधिकरणहेतुमत्पर्वतादिनिष्ठव-
ह्निसामान्याभावप्रतियोगितावच्छेदकीभूतवह्नित्वादेः स्वविशिष्टसंबंधिनिष्ठनिरुक्तप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेद
कत्वात् प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिवैयधिकरण्यप्रवेशेतुतादृशप्रतियोगितायाअवच्छेदकंयद्वह्नित्वादिकंतदवच्छिन्नानधि
करणत्वं नहेतुमतः पर्वतादेरित्यदोषइत्याहुः परेतुप्रतियोगिभेदेप्येकधर्मावच्छिन्नप्रतियोगितालाघवादैक्यमितिमतेवह्निमान्धूमादित्या
दौनाव्याप्तिः परंतुतद्रूपान्यत्वविशिष्टसत्तावान्रूपत्वादावतिव्याप्तिरेवस्याद्यदिप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिव्यधिकरणाभा-
वोमौलोनस्यात् प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकस्यघटत्वादेः सर्वस्यैवतद्रूपान्यत्वविशिष्टसत्तात्वावच्छिन्नसं
बंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वेनतादृशसत्तात्वस्यपारिभाषिकानवच्छेदकत्वादितिप्राहुः इदंत्ववधातव्यं अत्रापिलक्षणेहेतुम

जा॰अ॰ न्निष्ठाभावप्रतियोगितावच्छेदकं यद्यत्संबंधेन यादृशयादृशधर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकं न तत्संबंधेन तादृश
८ तादृशधर्मावच्छिन्नविशेष्यतान्यसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नविशेष्यतावच्छेदकत्वमेव साध्यतावच्छेदके द्रष्टव्यं नातः
प्रागुक्तदोषाणामवकाशो न वा महानसीयवह्नित्वादेः पारिभाषिकावच्छेदकतया तदन्यत्वस्य वह्नित्वादावसत्त्वेपि वह्निमान्धूमादि-
त्यादावव्याप्तिः विशिष्टवह्नित्वाभिन्नस्यापि वह्नित्वस्य विशिष्टवह्नित्वावच्छिन्नविशेष्यतान्यविशेष्यतावच्छेदकत्वानपायात् ननु घ
टवान्महाकालत्वादित्यादावव्याप्तिः गगनत्वादिविशिष्टस्य कालिकादिसंबंधेन संबंध्यप्रसिद्ध्या पारिभाषिकावच्छेदकत्वासंभवात् न
च साध्यतावच्छेदकसंबंधसामान्ये यादृशधर्मावच्छिन्नाभाववृत्त्यनुयोगिकत्वयद्धर्मविशिष्टप्रतियोगिकत्वोभयाभावस्तत्त्वं विवक्षि
तं तच्च गगनत्वादौ सुलभमिति वाच्यं तथा सति प्रमेयधूमवान्वह्नेरित्यादावतिव्याप्तेरित्युक्तत्वात् धूमत्वविशिष्टप्रतियोगिकत्वघटितता
दृशोभयत्वापेक्षया प्रमेयधूमत्वविशिष्टप्रतियोगिकत्वघटिततादृशोभयत्वस्य गुरुत्वेन तदवच्छिन्नप्रतियोगिताप्रसिद्धेरिति चेदत्र वदंति स्व
विशिष्टप्रतियोगित्वानिर्विशिष्योपादाय साध्यतावच्छेदकसंबंधसामान्ये हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकीभूततद्धर्मा
वच्छिन्नाभाववृत्त्यनुयोगिकत्वस्य यद्धर्मविशिष्टप्रतियोगिकत्वव्यक्तीनां प्रत्येकस्य च द्वयोर्व्यतिरेकः स धर्मः पारिभाषिकावच्छेदकः
प्रमेयधूमत्वावच्छिन्नप्रतियोगिकत्वघटितोभयत्वस्य गुरुतया प्रतियोगितानवच्छेदकत्वेपि तत्तद्धूमप्रतियोगिकत्वघटितोभयाभावकू
टमादायैव नातिव्याप्तिः कालो घटवान् महाकालत्वादित्यादौ च गगनत्वमेव तादृशावच्छेदकमादाय लक्षणसमन्वय इति वस्तुतस्तु हे राम
तुमन्निष्ठाभावप्रतियोगितावच्छेदको यो धर्मः प्रतियोगिव्यधिकरणतदवच्छिन्नाभाववत्तावच्छेदेन साध्यताघटकसंबंधावच्छिन्नसंबं

Indira Gandhi National Centre for the Arts

धितानिरूपितविशेषणतयायद्धर्मविशिष्टसंवंधित्वसामान्याभावस्तत्त्वेतद्धर्मे हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकधर्मावच्छिन्नप्रति-
योग्यनधिकरणतावच्छेदकत्वसामान्यस्य प्रकृतसाध्याधिकरणतावच्छेदकत्वनिरूपितस्वरूपसंवंधेनाभावस्तत्त्वे वा स्वविशिष्टसंवंधीत्या-
दिनिरुक्तेस्तात्पर्यात् गगनत्वादौस्तहजातः पारिभाषिकावच्छेदकत्वं सुलभमिति केचित्तु तादात्म्यसाध्यतावच्छेदकान्यतरसंवंधेन यः स्ववि-
शिष्टसंवंधी तन्निष्ठो यस्तदन्यतरसंवंधेन प्रतियोगिव्यधिकरणोऽभावस्तत्प्रतियोगितानवच्छेदकत्वमुक्तलक्षणार्थः तथा च ताद्दशान्य-
तरतादात्म्यसंवंधेन गगनत्वविशिष्टसंवंधिन्याकाशे वर्तमानो गगनाभावो नैताद्दशान्यतरसंवंधेन प्रतियोगिव्यधिकरणस्तस्य तादात्म्येन प्र-
तियोगिसमानाधिकरणत्वात् किंतु घटाभाव एव तथेति तत्प्रतियोगितानवच्छेदकमेव हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतं गगनत्वमि-
ति तमादायैव कालो घटवान्महाकालत्वादित्यादौ लक्षणसंगतिः न चैवं धूमगगनाभावान्यतरस्य संयोगेन साध्यत्वे वह्न्यादावतिव्याप्तिः ताद-
दृशान्यतरत्वापेक्षया लघुत्वेन धूमत्वस्यैव हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वात्तस्य च संयोगतादात्म्यान्यतरसंवंधेन यत्तदन्यतरत्व-
विशिष्टस्य संवंधी गगनाभावस्तन्निष्ठस्य तादात्म्यसंयोगान्यतरसंवंधेन प्रतियोगिव्यधिकरणस्य धूमाभावस्य प्रतियोगितावच्छेदकतया धूमगग-
नाभावान्यतरत्वस्य पारिभाषिकावच्छेदकत्वविरहादिति वाच्यं धूमगगनाभावान्यतरत्वस्याप्यखंडस्य धूमत्वतुल्यतया तस्यैव हेतुमन्निष्ठाभावप्रति-
योगितावच्छेदकस्य स्वविशिष्टसंवंधिनिष्ठताद्दशसंवंधावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकतया पारिभाषिकावच्छेदक-
त्वेनातिव्याप्तिविरहादिति प्राहुस्तन्मंदं रूपवान्घटत्वादित्यादावव्याप्तिप्रसंगात् हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यद्रूपत्वद्रव्यान्य-
तरत्वं तस्य ताद्दशसंवंधेन रूपत्वविशिष्टसंवंधिनिष्ठताद्दशसंवंधावच्छिन्नप्रतियोगिव्यधिकरणाभावप्रतियोगितानवच्छेदकत्वेन रूपत्वस्य पारि-

ग्रा.अ. भाषिकावच्छेदकत्वात् नचाहितादात्म्यसमवायान्यतरसंबंधेनयद्रूपविशिष्टस्यसंबंधिरूपं पृथिव्यादिकं वानतत्र तादात्म्यसमवायान्यतरसंबंधेनप्र
६ तियोगिव्यधिकरणोनरूपत्वद्रव्यान्यतरत्वावच्छिन्नाभावः समवायेनरूपे रूपत्वास्यप्रतियोगिनस्तादात्म्येनचपृथिव्यादौद्रव्यात्मकप्रतियोगि
नःसंबंधत्वात् किंतुरूपत्वविशिष्टस्यतथाविधसंबंधिनिष्ठोयः घटाद्यभावएवतादृशप्रतियोगिव्यधिकरणइ निरूपत्वद्रव्यान्यतरत्वेनप्रतियो-
गितानवच्छेदकत्वध्रौव्यात् नचहेतुसमानाधिकरणस्याभावस्यापितादृशान्यतरसंबंधेनप्रतियोगिवैयधिकरण्यस्यवक्तव्यत्वान्नैष दोषः त
थासतिसमवायेनघटस्यप्रमेयस्यवासाध्यत्वेतादात्म्येनहेतौघटत्वेप्रमेयेवातिप्रसंगादितिदिक् अतएवेति वस्तुतस्त्वित्यादिकल्पस्याहृत
त्वादेवेत्यर्थः यथाश्रुतस्यावच्छेदकानतिरिक्तवृत्तित्वस्यादरेतुसत्तावान्जातेरित्यादावव्याप्तिः स्यादेवेतिभावः जातिमन्निष्ठाभावप्रतियोगि
तायांसत्तात्वान्यूनवृत्तित्वविशिष्टसत्तात्वावच्छेद्यत्वसमवायसंबंधावच्छेद्यत्वोभयसत्त्वादवच्छेद्यताघटितलक्षणस्यापिप्रागुक्तस्यापिस-
त्तावान्जातेरित्यादावव्याप्तिः तस्मादपिपरिष्करोति एवमितिस्वसाध्यतावच्छेदकं अत्रस्ववैशिष्ट्यंसाध्यतावच्छेदकताघटकसम्बंधेनैववाच्यं ते
नधूमत्वादीनांकालिकादिसंबंधेनधूमत्वादिविशिष्टस्यघटादेः संयोगिनिवर्तमानस्याभावस्यप्रतियोगितावच्छेदकत्वेपिधूमवान्वन्हेरित्यादौना
तिव्याप्तिः स्वविशिष्टस्यसंबंधित्वंसाध्यतावच्छेदकसंबंधेनग्राह्यं तेनधूमत्वाद्यवच्छिन्नप्रतियोगितायांकालिकादिसंबंधेनयद्धूमत्वविशिष्टस्य
सम्बंधितन्निष्ठाभावप्रतियोगितानवच्छेदकावच्छेद्यत्वविरहेपिधूमवान्वन्हेरित्यादौनातिव्याप्तिः नचसामान्यतोधूमसंबंधिनिसंयोगेनसर्वस्यै
वाभावसत्त्वाद्धूमवन्निष्ठसंयोगसंबंधावच्छिन्नप्रतियोगितानवच्छेदकाप्रसिद्ध्याकथमितिव्याप्तिरितिवाच्यं गोत्वत्वघटाभावत्वादेरेवतत्प्रसिद्धेः राम
संयोगसंबंधावच्छिन्नगोत्वाद्यभावप्रतियोगितायालाघवेनगवेतरासमवेतादिभिरेवावच्छेदात् नचैवमपितदवच्छेद्यत्वाप्रसिद्धौवनातिव्याप्तिः ६

गोत्वादिभेदप्रतियोगितायां तत्सौलभ्यात् नहि साऽपि गवेतरासमवेतत्वमात्रावच्छिन्ना गोरूपादौ गोत्वभेदासत्त्वप्रसंगात् यदि गोत्वत्वावच्छेद्य
त्वसंयोगसंबंधावच्छेद्यत्वोभयत्वावच्छिन्नाभावाप्रसिद्ध्यैव नातिव्याप्तिः गवेतरासमवेतत्वाद्यवच्छेद्यत्वमात्रघटितेन तादृशोभयत्वस्यैव लघुत्वे
न प्रतियोगितावच्छेदकत्वादिति विभाव्यते नदोक्तरीत्या वह्निमान्धूमादित्यादावव्याप्तिवारणार्थमेव साध्यतावच्छेदकसंबंधेन स्वविशिष्टस्य
संबंधित्वं निवेश्यं इत्थं च निरुक्तप्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितासामान्ये एव साध्यवन्निष्ठाभावीयसंयोगसंबंधावच्छिन्न
प्रतियोगितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वसंयोगसंबंधावच्छेद्यत्वोभयत्वावच्छिन्नाभावसत्त्वाद्धूमवान्वह्नेरित्यत्रैवातिव्या-
प्तिः गुरुनयोक्तक्रमेण तादृशोभयत्वावच्छिन्नाभावाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तिर्वा स्यादतः प्रतियोग्यसंबंधत्वेनापि स्वविशिष्ट
संबंधी संबंधी विशेषणीयः तदर्थश्च प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नासम्बन्धित्वं तेन सम्बन्धसामान्येन यत्प्र-
तियोगितावच्छेदकावच्छिन्नासंबंधी वह्नित्वविशिष्टसंबंधी पर्वतादिस्तन्निष्ठस्य प्रलयोत्तन्नकर्मीसत्त्वाभावस्य प्रतियोगितानवच्छेदकं
यद्गुरुत्वादिकं तदवच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वयोश्च साधनवन्निष्ठाभावप्रतियोगितायां सत्त्वेऽपि वह्निमान्धूमादित्यादौ नाव्याप्तिः
नवा प्रतियोग्यसम्बन्धिसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकीभूतविशिष्टसत्तात्वाद्यवच्छेद्यत्वसमवायसम्बन्धावच्छेद्यत्वयोः साध-
नवन्निष्ठाभावप्रतियोगितायां सत्त्वेऽपि सत्तावान्जातेरित्यादावव्याप्तिप्रसंगः । प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धीयः साध्य-
तावच्छेदकावच्छिन्नसम्बन्धितन्निष्ठाभावप्रतियोगितानवच्छेदकं न घटाद्यभावत्वगोत्वत्वादिकं तस्यापि साध्यवन्निष्ठतादृशभेदादिप्र-
तियोगितावच्छेदकत्वात् किंतु लघुसमनियतं गुरुप्रमेयधूमत्वादिकमेव तथा इत्थाच तदवच्छेद्यत्वाप्रसिद्ध्या वह्निमान्धूमादित्यादावसंभ

Indira Gandhi National Centre for the Arts

मा·अ· वोव्याप्तिर्वैत्यत्नः साध्यवन्निष्ठाभावप्रतियोगित्वमपि साध्यतावच्छेदकसम्बन्धावच्छिन्नं ग्राह्यं तेन संयोगादिसंबंधावच्छिन्नप्रतियोगितानव-
१० च्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वप्रसिद्ध्या वलक्षणसंभवः वस्तुतः प्रागुक्तयुक्त्यात्रापि साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसम्बन्धि सा-
ध्यतावच्छेदकावच्छिन्नसम्बन्धिनो वक्तव्यं ननु प्रतियोगिनापि तादृशासम्बन्धावच्छिन्नायाप्रसिद्धा नन्वेवमपि साध्यतावच्छेदकसम्बन्धेन प्र-
तियोग्यसम्बन्धिसाध्यतावच्छेदकावच्छिन्नसम्बन्धिनिष्ठाभावाप्रसिद्ध्या विभुत्वविशिष्टघटवान्महाकालत्वादित्यादावव्याप्तिः महाकाला-
न्यत्वघटत्वावच्छिन्नाभावस्यैव तादृशस्य कथंचिन्महाकाले प्रसिद्ध्या तत्राव्याप्तिवारणेऽपि न द्वह्नीयसंयोगसम्बन्धेन वन्हेः साध्यतायां सद्धेता-
वव्याप्तिः तत्संबंधेन यत्प्रतियोगिसंबंधितदन्यत्वस्य तद्वह्निमत्यभावात् महाकालनिरूपितविशेषणतया घटादेः साध्यतायां महाकाल-
त्वहेतावुक्तक्रमेणाप्यव्याप्तिवारणासंभवाच्च तेन संबन्धेन यः प्रतियोगिसंबन्धी तदन्यत्वस्य महाकाकाले विरहात् न च साध्यतावच्छेदक-
संबंधसामान्ये साध्यतावच्छेदकावच्छिन्नसंबंधियत्किंचिद्व्यक्त्यनुयोगिकत्व यादृशप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिकत्वोभयाभा-
वस्तादृशप्रतियोगितानवच्छेदकावच्छिन्नत्वनिवेशमतो गगनाभावद्वारैव प्रसिद्धिरिति वाच्यं स्वरूपसंबंधेन गगनादेर्हेतिमत्त्वपक्षे एव।
प्रतियोगितादधर्मिकोभयाभावगर्भनिरुक्त्याद्दरात्। तत्र गगनाभावमादाय प्रसिद्ध्यासंभवात् कालिकविशेषतायां गगनत्वावच्छिन्नप्रतियो-
गिकत्वसाध्यवन्महाकालानुयोगिकत्वयोः सत्त्वादिति चेदेतादृश्वरसेनैव प्रतियोगितयोरित्यादिना प्रतियोगिवैयधिकरण्यमुपेक्ष्य लक्षणां-
न्तरं वक्ष्यत इत्येके परे तु निरुक्तप्रतियोग्यसंबंधिप्रकृतसाध्यवन्निष्ठाभावप्रतियोगितायां यद्यद्धर्मावच्छेद्यत्वसाध्यतावच्छेदकसंबंधावच्छिन्न- राम
त्वोभयाभावः प्रतियोगितावच्छेदकावच्छिन्नप्रतियोग्यनधिकरणप्रकृतहेतुमन्निष्ठाभावप्रतियोगितासामान्येऽपि तादृशोभयाभावकूटवत्त्वं १०

Indira Gandhi National Centre for the Arts

विवक्षितं अस्ति च समवायादवच्छिन्नघटाद्यभावप्रतियोगितायां यत्कालिकसंबंधावच्छिन्नत्वघटत्वावच्छिन्नत्वोभयाभाववत्त्वं तद्देशप्रतियोग्यनधि-
करणमहाकालनिष्ठाभावप्रतियोगितासामान्येपीति घटवान्महाकालत्वादित्यादौ नाव्याप्तिः यद्यादिनिवेशादरान्निरुक्तप्रतियोग्यनधिकरण-
हेतुमन्निष्ठाभावप्रतियोगितासामान्ये स्वगुणत्वावच्छेद्यत्वस्वसंयोगसंबंधावच्छेद्यत्वोभयाभावसत्त्वेपि धूमवान्वन्हेरित्यादौ नातिव्याप्तिः धूमत्वा-
वच्छेद्यत्वसंयोगसम्बन्धावच्छेद्यत्वोभयाभावस्यापि तादृशत्वेन तस्यैव प्रतियोग्यनधिकरणवन्हिमन्निष्ठाभावप्रतियोगितासामान्ये विरहात्सं-
योगसंबंधावच्छिन्नधूमाभावप्रतियोगितायां तदसत्त्वादित्याहुः ननु स्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छेदकेत्यत्रानवच्छेदकत्वं
न तादृशावच्छेदकप्रतियोगिकभेदमात्रं धर्ममात्रस्यैव तादृशयत्किंचिदवच्छेदकभिन्नत्वेनाव्याप्तिलक्षणासंभवप्रसंगात् किंतु तादृशप्रतियो-
गितावच्छेदकत्वावच्छिन्नप्रतियोगिताकोभेदस्तथाचावच्छेदकत्वगर्भोयानिरुक्तेः प्रमेयधूमवान्वन्हेरित्यादावतिव्याप्तिः अवच्छेद्यत्वगर्भो-
यास्तु प्रमेयवन्हिमान्धूमादित्यादावव्याप्तिः प्रमेयवन्हित्वविशिष्टसंबंधिनिष्ठाभावप्रतियोगितावच्छेदकत्वप्रतियोगितायालाघवेन वन्हिम-
न्निष्ठाभावप्रतियोगितावच्छेदकत्वेनैवावच्छेदादित्यत आह। प्रतियोगिताश्चेति। तादृशावच्छेदकनिष्ठप्रतियोगिताव्यक्तयो विशेष्यतत्तदवच्छेदक-
त्वावच्छिन्नत्वेन प्रवेशनीया न त्वनुगततादृशावच्छेदकत्वावच्छिन्नत्वेन यतो गुरुधर्मस्यानवच्छेदकत्वे व्याप्तेर्दुर्वचत्वं स्यादित्यर्थः। स्वविशिष्टसंबं-
धिनिष्ठाभावीयप्रतियोगिताविशेष्योपादाय तत्तत्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदकूटवत्त्वं निवेशनीयमिति त्वपव्याख्यानं तत्तत्प्रतियोगिता-
विशेषितावच्छेदकत्वव्यक्तीनां वास्तविकतत्तदवच्छेदकत्वव्यक्तीरपेक्ष्य गुरुत्वेन तत्प्रतियोगितानिरूपितावच्छेदकत्वावच्छिन्नभेदानामप्रसि-
द्ध्या दुर्वचत्वतादवस्थ्यात् यदि च समनियतनानाधर्मावच्छिन्नप्रतियोगित्वस्य भेदे मानाभावस्तदा तत्तत्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदकू-

Indira Gandhi National Centre for the Arts

जा॰अ॰ दस्यप्रवेशापि नस्यात्ः ननु प्रतियोगिनावच्छेदकत्वस्य तत्तदवच्छेदकत्वसमनैयत्याभावेन गुरुत्वस्याकिंचित्करत्वादिति ध्येयं सम्बन्धभेदमि।
३१ ति इदं च प्रागेव निरुक्तव्याख्यायां प्रपंचितं ननु प्रतियोग्यनधिकरणहेतुमन्निष्ठाभावप्रतियोगितायाः संयोगत्वावच्छेद्यत्वेपि संयोगत्वस्य स्व-
विशिष्टसम्बंधिनिष्ठाभावप्रतियोगितानवच्छेदकत्वाभावात् संयोगीसत्वादित्यत्राव्याप्तिरत आह। भावश्चेति। निरुक्तिचयेपि शेषः तथा च नि
रुक्तप्रतियोग्यनधिकरणस्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकत्वं संयोगत्वे व्यस्तमिति हेतुमन्निष्ठाभावप्रतियोगितायाः तदव
च्छेद्यत्वाभावादेव नाव्याप्तिरिति भावः ननु एवं गोमान् महाकालत्वादित्यत्राव्याप्तिः गोत्वविशिष्टसम्बंधिनिष्ठस्याभावमात्रस्यैव साध्मतायत्र
कैकालिकसम्बन्धेन प्रतियोगिसमानाधिकरणतया स्वविशिष्टसम्बन्धिनिष्ठप्रतियोग्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वाप्रसिद्धे
रत आह। कालिकेति तथा च स्वावच्छिन्नाधिकरणसाध्यवत्त्वखण्डकालनिष्ठाभावप्रतियोगितावच्छेदकत्वनैव तन्महाकालत्वे निरुक्तावच्छेदक
त्वं सुलभमिति भावः। ननु हेतुमन्निष्ठाभावीयसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकमात्रस्यैव घटत्वादिविशिष्टसंबंधिनिष्ठाभावी
यसंयोगसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वात्पारिभाषिकावच्छेदकाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तिवारकं द्वितीयनिरुक्ता
वभावे प्रतियोगिवैयधिकरण्यं प्रवेश्य तामवच्छेद्यत्वघटितद्वितीयनिरुक्तावपि हेतुमन्निष्ठाभावप्रतियोगितासामान्ये एव धूमत्वविशिष्टसंबंधि
निष्ठाभावीयसंयोगसंबन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतगोत्वत्वाद्यवच्छेद्यत्वाभावात् धूमवान्वह्नेरित्यादावतिव्याप्तिवारणार्थ
मभावेन द्विशेषणं द्वितीयतां प्रथमनिरुक्तौ तु प्रतियोगिवैयधिकरण्यमभावविशेषणं किमर्थमित्याशंकायां ने नचेति वाच्यमिति परेणान्वयः सं राम
योगीद्रव्यत्वादित्यादावव्याप्तिवारणं मौलस्य फलं अन्यथोपपादयति संयोगत्वावच्छिन्नेति द्वनेरिति अव्याप्त्यनवकाशादित्यनेनान्वयः सं ३१

Indira Gandhi National Centre for the Arts

योगिसत्त्वादित्यादावतिव्याप्तिवारणमिदमीयस्यफलमन्यथाकुरुते गुणादीति द्रव्यत्वत्वं द्रव्यान्यासमवेतत्वविशिष्टसकलद्रव्यसमवेतत्वं तच्च तत्समवायसम्बन्धेनाभावस्यप्रतियोगितावच्छेदकलाघवेनद्रव्यान्यासमवेतत्वस्यैवतत्त्वादित्यतस्तथैवाह। द्रव्यमात्रेति द्रव्यान्यासमवेतत्वस्यार्थः अवृत्तेरिति। अतिव्याप्त्यनवकाशादितियोजना धूमवान्वह्नेरितिसंयोगेनद्रव्याणामव्याप्यवृत्तितया धूमत्वावच्छिन्नाभाववत्यपिधूमत्वादिविशिष्टस्यसत्त्वादितिभावः ननुहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकं यदयोगोलकासंयुक्तत्वं धूमस्य विशिष्टस्यतदवच्छिन्नाभाववद्वह्नि-त्वादेवनातिव्याप्तिरतआह। नहीति इत्थंचावच्छेदकनिरुक्तौप्रतियोगिवैयधिकरण्यप्रवेशोमूलोक्तहेतुसमानाधिकरणाभावेपिनद्रव्यमन्य-याहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकधूमसंयोगत्वावच्छिन्नाभावस्यप्रतियोगिवैयधिकरण्यावच्छिन्नस्याधिकरणेगुणादौसंयोगत्वादिविशिष्टस्यावृत्तेः संयोगीद्रव्यत्वादित्यादावव्याप्तिरितिभावः लाघवमभिप्रेत्याह। प्रतियोगितयोरिति मौलइदमीयप्रतियोगितयोरित्यर्थः। तथाच हेतुमन्निष्ठाभावीययत्संबंधावच्छिन्नप्रतियोगितावच्छेदकीभूतयत्किंचिद्धर्मावच्छिन्नतत्तत्संबन्धावच्छिन्नप्रतियोगिताकाभाववदसंभवद्यत्काविशिष्टसामान्यकत्वंप्रथमस्यतुस्वविशिष्टसम्बन्धिनिष्ठाभावीययत्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकीभूतहेतुसमानाधिकरणाभावीयतत्तत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वमर्थः तत्तत्संबन्धावच्छिन्नपर्य्यवसन्नस्यैकसम्बन्धावच्छिन्नत्वस्याननुगमाद्विशेषणताविशेषावच्छिन्नत्वप्रवेशावश्यकत्वेनसम्बन्धान्तरप्रवेशोगौरवान्तदपेक्षयालाघवाच्चाह विशेषणतेति अभावीयविशेषणतायालक्षणघटकत्वमभिप्रेत्याह तदन्यत्वेति प्रमाविषयतीयविशेषणतायास्तथात्वमभिप्रेत्याह। तदन्यस्वप्रकारेति। साध्यव-त्त्वस्यावश्योपस्थितिकतयातद्घटितधर्मस्योपस्थितिलाघवात्तमादायैवातिव्याप्तिवारणंसुघटमित्याशयेनाह। साध्यवत्त्वेति। नन्वेवं विशे

Indira Gandhi National Centre for the Arts

जा.अ षणताविशेषावच्छिन्नप्रतियोगितासामान्ये यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितानवच्छेदकीभूतधर्मावच्छिन्नत्वसाध्यतावच्छे
२२ दकसम्बन्धावच्छिन्नत्वोभयाभावः साध्यतावच्छेदकसम्बन्धेन तद्धर्मावच्छिन्नो हेतुव्यापक इत्युक्तक्रमेणानुनीयार्थः फलितः तथाच विशेष
णताविशेषावच्छिन्नप्रतियोगितासामान्य एव साध्यतावच्छेदकीभूतसंयोगसंबंधावच्छिन्नत्वाभावेन तादृशोभयाभावसत्त्वात् धूमवान्वन्हे
रित्यादावतिव्याप्तिः नच हेतुमन्निष्ठाभावप्रतियोगिताया विशेषणताविशेषावच्छिन्नत्वं न देयमिति वाच्यं वन्हिमत्त्वप्रकारकप्रमाविशेष्यत्वा-
दीनां संयोगादिसम्बन्धेनाभावस्य हेतुमति सत्त्वेन वन्हिमान् धूमादित्यादौ सर्वत्रैवाव्याप्तिप्रसंगादित्यतः साध्यतावच्छेदकसम्बन्धावच्छि-
न्नत्वांशपरित्यागेन तृतीयस्यार्थं निःकृष्य दर्शयति तथाचेत्यादिना। यद्धर्मेति। यत्पदं साध्यतावच्छेदकपरं। तत्सम्बन्धावच्छिन्नेति। विशेष-
णताविशेषावच्छिन्नेत्यर्थः अत्र प्रतिपदव्यावृत्तिरुक्तदिशा बोध्या नच निरुक्तप्रतियोगितासामान्ये यद्धर्मविशिष्टसम्बन्धिनिष्ठाभावीय-
विशेषणताविशेषावच्छिन्नप्रतियोगितावच्छेदकावच्छेद्यत्वं साधने तद्धर्मावच्छिन्नसामानाधिकरण्यमेव लाघवाद्व्याप्तिरुचितेति वाच्यं
सामान्यपदस्य व्यापकतावाचित्वेन निरुक्तप्रतियोगितात्वव्यापकावच्छेदकं यद्धर्मावच्छिन्नवन्निष्ठविशेषणताविशेषावच्छिन्नाभावप्रति
योगितावच्छेदकावच्छेद्यतात्वमित्यर्थपर्य्यवसानेन प्रमेयधूमवान्वन्हेरित्यादावतिव्याप्त्यापत्तेः प्रमेयधूमवन्निष्ठाभावप्रतियोगितावच्छेद
कावच्छेद्यतात्वस्य गुरुधर्मतया वन्हिवन्निष्ठाभावप्रतियोगितात्ववन्निष्ठाभावप्रतियोगितानवच्छेदकत्वेन तादृशप्रतियोगितात्वव्यापकतावच्छे
दकत्वात्। अस्माकंतु प्रमेयधूमत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितानवच्छेदकं यदयः पिण्डभेदत्वं तदवच्छेद्यत्वाभावस्यैव साधनवन्निष्ठाभा- राम
वप्रतियोगितात्वव्यापकत्वाभावेनातिव्याप्त्यभावात् एतेन साधनसमानाधिकरणाभावसामान्ये यद्धर्मावच्छिन्नसमानाधिकरणाभावत्वं २२

Indira Gandhi National Centre for the Arts

हृदाभावप्रतियोगितासामान्येवायद्धर्मावच्छिन्नसमानाधिकरणाभावप्रतियोगितात्वंसाधनेनतद्धर्मावच्छिन्नसामानाधिकरण्यंव्याप्ति-
र्लाघवादित्यपिप्रत्युक्तमितिध्येयंसाध्यसाधनभेदेनव्याप्तेर्भिन्नतयाप्रमेयवन्हित्वादिनागुरुधर्मेणसाध्यतास्थलेएवसाध्यतावच्छेदकावच्छे
दत्वाप्रसिद्ध्याप्रोक्तक्रमेणव्याप्तिर्वाच्यावन्हिमान्धूमादित्यादौतुलघुक्रमेणसाध्यतास्थलेहेतुमन्निष्ठाभावप्रतियोगितासामान्येयत्संबंधावच्छि
न्नत्वयद्धर्मावच्छिन्नात्वोभयाभावघटितैवसावक्तव्याशब्देकास्याकिंचित्करत्वादित्याह। यत्रसद्धेतुविशेषइति नव्यमतमुपन्यस्यतिगौरवेति
याहशाप्रतीत्यागुरोरवच्छेदकत्वप्रसिद्धिः नाहशबुद्धौगौरवज्ञानस्ययदिविरोधित्वंस्यात्तदामानाभावाद्गुरोरवच्छेदकत्वंनस्यात् नचैतदस्ती-
तिभावः यद्यपिगौरवज्ञानमात्रंनावच्छेदकत्वधीप्रतिबंधकंविशिष्टसत्तात्वस्यद्रव्यत्वत्वापेक्षयागुरुत्वग्रहेपिविशिष्टसत्तानास्तीतिप्रतीत्या
तदवच्छेदकत्वग्रहस्यप्राचैः स्वीकृतत्वात् नचतद्धर्मसमानाधिकरणधर्मधर्मिकतदपेक्षयालघुत्वग्रहस्तद्धर्मस्यावच्छेदकत्वधीप्रतिबंधकः
नीलधूमत्वसमानाधिकरणधूमत्वेनतदपेक्षयालघुत्वग्रहेपिनीलधूमोनास्तीतिप्रतीत्यानीलधूमत्वस्यावच्छेदकत्वावगाहनस्यसर्वसंमतत्वा
त् नापितद्धर्मसमनियतधर्मधर्मिकएवतद्धर्मापेक्षयालघुत्वग्रहस्तद्धर्मस्यावच्छेदकत्वधीप्रतिबंधकइतिसांप्रतं घटज्ञानत्वापेक्षयालघुनो
पिज्ञानत्वस्यघटज्ञानत्वसमनियतत्वाभावाद्गुरुणोपिघटज्ञानत्वस्यसंयोगसम्बन्धावच्छिन्नघटज्ञानाभावस्यप्रतियोगितावच्छेदकत्वापत्तेः
तथापिसंसर्गमर्यादयाप्रतियोगितावच्छेदकत्वग्रहंप्रतितादात्म्येनकंबुग्रीवादिमत्त्वरूपगुरुधर्मः प्रतिबंधकइतिनकदाचिदपितेषवच्छेदक
त्वग्रहइतिप्राचानामर्यवस्तुतः संसर्गमर्यादयाकंबुग्रीवादिमत्त्वावच्छेद्यप्रतियोगिताकत्वावगाहिज्ञानसमानविशेष्यत्वप्रत्यासत्त्याकंबुग्री
वादिमत्त्वापेक्षयालघुधर्मावच्छिन्नप्रतियोगिताकत्वज्ञानत्वेनैवप्रतिबंधकत्वंप्राचामभिप्रेतं तथाचजलादौनिर्वन्हित्वस्यायहदशायांवन्हि

भ्रमस्यैवतदुक्तंक्रमेणगौरवस्याग्रहदशायामपिकंबुग्रीवादिमत्त्वावच्छिन्नप्रतियोगिताकत्वेनतादृशाग्रहोजायतएव अन्यथाकंबुग्रीवादि
मान्नास्तीतिधियोः बाधनिश्चयविधयाविशिष्टधीविरोधित्वानुपपत्तेः कंबुग्रीवादिमत्त्वावच्छिन्नस्यविशिष्टबुद्धौतदवच्छिन्नप्रतियोगिताक
त्वेनाभावनिश्चयस्यविरोधित्वादितिध्येयम् । प्रतीतेवैतमवच्छेदकत्वावगाहित्वंगुरुरपीति तथाचस्वरूपावच्छेदकत्वयदितंमूलोक्तंयथाम
त्युतमेवलक्षणंसम्यक्तप्रमेयधूमत्वादेस्तादृशावच्छेदकत्वेनव्यभिचारिण्यतिव्याप्तिविरहादितिव्रक्तंपारिभाषिकावच्छेदकत्वनिर्वचनेनेति ।
भावः ननूक्तज्ञानस्यविरोधित्वात्तादृशप्रतीत्यावच्छेदकत्वंनावगाह्यतेपरंतुकंबुग्रीवादिमन्निष्ठप्रतियोगिताकाभावमात्रमित्याशंक्यनिषेधयति
।नचेति। अवलम्बनंविषयः तथाविधेति। कंबुग्रीवादिमत्त्वाश्रयेत्यर्थः तादृशप्रतीतेः कंबुग्रीवादिमान्नास्तीत्याकारकप्रतीतेः अनुदयादिति त-
थाचतत्त्वमतेकंबुग्रीवादिमदंतरस्याभावमादायतदुदयप्रसंगइतिभावः ननुतथाविधयत्किंचिद्व्यक्तिनिर्णयेसएवप्रतिबंधकः अन्यथाविशेषा
दर्शनदशायांतवापिकंबुग्रीवादिमान्नास्तीतिप्रतीतिर्जायतएवतत्रैत्यतआह। अतएवेतिगुरुधर्मस्यावच्छेदकत्वादेवेत्यर्थः तत्प्रमाणमितिकं
बुग्रीवादिमत्त्वावच्छिन्नाभावप्रकारत्वेनतादृशान्वयबोधोभ्रमइतितादृशशब्दस्यभ्रमजनकत्वेनाप्रमाणत्वं तन्मतेचकंबुग्रीवादिमत्प्रतियो-
गिकाभावशून्यतायाघटवत्त्वसभावात् तादृशप्रतीतेर्भ्रमत्वमितितादृशशब्दोप्यप्रमाणंतस्यादित्यर्थः ननुभ्रमत्वस्यप्रकारभेदेनभिन्नत्वात्स
र्वत्रतदभाववद्विशेष्यकत्वंतद्भ्रमत्वघटकंसमवायेनगगनादिभ्रमेणतन्निवेशवैयर्थ्यात् ।तथाचतत्रैवप्रकृतेपिकंबुग्रीवादिमत्प्रतियोगिका
भावप्रकारतामात्रेणतादृशान्वयबोधोभ्रमोभविष्यतीत्याहप्रमाणंचेति ।तथाचतत्रापिकंबुग्रीवादिमान्नास्तीतिशब्दः प्रमाणंतस्यादित्यक्ता- राम
मेनापिप्रकृतेभ्रमत्वंतदभाववद्विशेष्यकत्वयदितंवाच्यमितिभावः धूमोनवन्हिव्याप्यइत्यादेर्वन्हिव्याप्यभावकूटार्थकत्ववत् कंबुग्रीवादिमान्ना-



Indira Gandhi National Centre for the Arts

क्लीत्यादावपि कंबुग्रीवादिमत्त्वप्रतियोगिकाभावकूटबोधकत्वादेव तादृशशब्दस्याप्रामाण्याद्युपपत्तिरन्यथा धूमालोकसाधारणानुगतव्याप्तेर
भावादालोकगर्भव्याप्तित्वावच्छिन्नाभावस्य धूमे सत्त्वात् तमादाय धूमो न वह्निव्याप्य इति वाक्यस्याप्रामाण्यापत्तेः एवं गुरुधर्मस्यानवच्छेदकतया
तादृशधर्मावच्छिन्नविशिष्टबुद्धिं प्रति तादृशधर्माश्रयप्रतियोगिकाभावकूटवत्तानिश्चयत्वेनैवानन्यगत्या विरोधित्वकल्पनात् कंबुग्रीवादिमा
न्नास्तीति दशायां कंबुग्रीवादिमदस्तीति ज्ञानविरोधोऽपि घटत इति प्राचीनमतनिर्भरः अतो गुरुधर्मस्यानवच्छेदकत्वे व्याप्तेरपि दुर्वचत्वमित्याह
न चेदेवमिति लघिष्ठेति द्रव्यं गुणाद्विशिष्टसत्त्वाद्वा इत्यादौ द्रव्यत्वसमनियतानां गुणत्वविशिष्टसत्त्वादीनामित्यर्थः अव्याप्तिमुपपादयति। गु-
णादीति। ननु हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वव्यक्तीनां तत्तद्व्यक्तित्वेनाभावकूटवत्त्वमेव साध्यतावच्छेदकांशे निवेश्यमतो नोक्तदोषा
न आह। तत्रेति। यद्यपि गुरोरवच्छेदकत्वपक्षेऽपि स्वस्वप्रतियोगिव्यधिकरणाभावघटितव्याप्तेस्तत्तत्प्रतियोगितागर्भत्वेन दुर्ज्ञेयत्वं। त-
थापि व्याप्यवृत्तिसाध्यकस्थलीयव्याप्तेरभिप्रायेणेदं तत्र प्रतियोगिवैयधिकरण्याप्रवेशात् निरवच्छिन्नहेत्वधिकरणवृत्तिकाभावप्रतियो
गितानवच्छेदकत्वमेव सर्वत्र व्याप्तिप्रविष्टमित्याशयेनेदमिति तु परमार्थः तेनाव्याप्यवृत्तिसाध्यकस्थलेऽपि व्याप्तेर्न ज्ञेयत्वमिति ध्येयं द्र-
व्यत्वत्वेति द्रव्यनिष्ठाभावप्रतियोगितावच्छेदकत्वापेक्षया द्रव्यत्वत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्य गुरुतया तदवच्छिन्ना
भावाप्रसिद्धेरिति भावः। ननु हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकीभूतयत्किंचिद्धर्मावच्छिन्नाभाववत्संबंधस्वविशिष्टसामान्यकभिन्नत्वं स्व
विशिष्टसंबंधिनिष्ठाभावीयप्रतियोगितावच्छेदकीभूततादृशधर्मावच्छिन्नत्वं यत्साध्यतावच्छेदकं तदवच्छिन्नसामानाधिकरण्यं व्याप्तिरित्यत्र
वा दुर्ज्ञेयत्वाभावात्तथैव व्याप्तिर्वाच्येत्यत आह उपदर्शितेति सत्त्वादित्यादिना व्यापकतापर्यवसन्नत्वस्य तत्तदवच्छेदकत्वाभावगर्भसामान्यत्व

SANS
181.43
JAG

IGNCA RAR
ACC. No. R-581

स्योपग्रहः अनएवगुरोरवच्छेदकत्वादेवसंगच्छन इति अन्यथाग्राह्यगंधत्वापेक्षयागुरुत्वेन घ्राणग्राह्यगुणत्वावच्छिन्नाभावाप्रसिद्ध्यानहृदृ-
निकत्वंव्यभिचरितत्वंतत्रनस्यादितिभावः यद्यपिसाध्यव्यापकतावच्छेदकधर्मावच्छिन्नाभाववद्वृत्तित्वमेवव्यभिचारः सचग्राह्यगंधत्वावच्छि-
न्नाभाववद्वृत्तित्वेनैवतत्रसुलभइत्यपिशक्यंनैवक्तुंतथापितद्बुद्धेः प्रकृतसाध्यानुमित्यविरोधितयाहेत्वाभासतानस्यात् यद्विषयकत्वेनया-
दृशानुमानविरोधितत्वंतस्यैवतत्रतथात्वादितिभावः ॥ इतिश्रीजगदीशविरचिताऽवच्छेदकत्वनिरुक्तिःसमाप्तिमगमत् ॥ छ ॥